শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

সেৱা শ্রী শ্রীনিৱাসরাঘৱার্য মহাদেশিক ৱিরচিতং

॥ শ্রীলক্ষ্মীহযৱদন সুপ্রভাতম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রীলক্ষ্মীহযৱদন সুপ্রভাতম্ ॥

ৱেধোমুখৈর্ৱিধিৱদর্চিতপাদপদ্ম
    ৱেদপ্রদান পরিকর্মিত হস্তপদ্ম।
ৱিশ্ৱানুপালনকৃতক্ষণনেত্রপদ্ম
    লক্ষ্মীহযাস্য ভগৱন্ তৱ সুপ্রভাতম্॥ **1** ॥

যদ্ৱেধসাং প্রথমশিক্ষণমন্ৱতানীঃ
    ৱেধোঽৱলেপৱিহতিং পুনরভ্যকার্ষীঃ।
অত্যাদরাৎপুনরিহাগতৱান্ মদর্থে
    লক্ষ্মীহযাস্য ভগৱন্ তৱ সুপ্রভাতম্॥ **2** ॥

নিদ্রাতুরে জগতি নীচপথপ্রৱৃত্তে
    নেত্রে নিমীল্য নিগমাধ্ৱনি নির্ৱিশঙ্কে।
নিদ্রাং জহি ৎৱম্ অধুনা মধুবোধনার্থং
    লক্ষ্মীহযাস্য ভগৱন্ তৱ সুপ্রভাতম্॥ **3** ॥

ৎৱাং মাধৱং মধুভিদং বহুমানমেযং
    মধ্ৱাশযা মধুলিহো বহুভাগধেযম্।
ভোক্তুং গৃণন্তি মধুমত্তমজিহ্ৱিযা দ্রাক্
    লক্ষ্মীহযাস্য ভগৱন্ তৱ সুপ্রভাতম্॥ **4** ॥

শ্রুত্যা শ্রিযা সমুপসেৱিতদিৱ্যরূপ
    স্মৃত্যাদিভিঃ সমুপবৃংহিতদিৱ্যনামন্।
ভক্তিপ্রপত্তিপরিপোষিতদিৱ্যতেজ
    লক্ষ্মীহযাস্য ভগৱন্ তৱ সুপ্রভাতম্॥ **5** ॥

হেষারৱ শ্রুতিরিতি শ্রুতমাত্মৱিদ্ভিঃ
হেষাং তৱানুভৱিতুং শ্রুতিমুদ্গণন্তি।
শ্রুৎৱাদ্য জাগৃহি মযাপ্রতি বোধিতস্সন্
লক্ষ্মীহযাস্য ভগৱন্ তৱ সুপ্রভাতম্॥ **6**॥

সাম্যং দদাসি পরমং ৎৱদুপাসকানাং
ৱেদান্তদেশিকগুরৌ প্রতিপন্নমেতম্।
ৱ্যাখ্যানকৌশলকরং শ্রুতিপুস্তকং চ
লক্ষ্মীহযাস্য ভগৱন্ তৱ সুপ্রভাতম্॥ **7**॥

ৱেদান্তদেশিকগুরুস্তৱ পূজনায
ৎৱৎপাদপঙ্কজ সমর্পিতসর্ৱভারঃ।
আস্তেধি সাৎৱিকগণৈর্মণিমণ্ডপং তে
লক্ষ্মীহযাস্য ভগৱন্ তৱ সুপ্রভাতম্॥ **8**॥

॥ ইতি শ্রীলক্ষ্মীহযৱদন সুপ্রভাতং সমাপ্তম্॥